श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकोनाशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनाशीतितमः सर्गः ॥

## इक्ष्वाकुसुतस्य दण्डस्य राज्यम्

तदद्भुततमं वाक्यं श्रुत्वागस्त्यस्य राघवः।
गौरवाद् विस्मयाच्चैव भूयः प्रष्टुं प्रचक्रमे ॥ **7.79.1** ॥

भगवंस्तद् वनं घोरं तपस्तप्यति यत्र सः।
श्वेतो वैदर्भको राजा कथं तदमृगद्विजम् ॥ **7.79.2** ॥

तद् वनं स कथं राजा शून्यं मनुजवर्जितम्।
तपश्चर्तुं प्रविष्टः स श्रोतुमिच्छामि तत्त्वतः ॥ **7.79.3** ॥

रामस्य वचनं श्रुत्वा कौतूहलसमन्वितम्।
वाक्यं परमतेजस्वी वक्तुमेवोपचक्रमे ॥ **7.79.4** ॥

पुरा कृतयुगे राम मनुर्दण्डधरः प्रभुः।
तस्य पुत्रो महानासीदिक्ष्वाकुः कुलनन्दनः ॥ **7.79.5** ॥

तं पुत्रं पूर्वकं राज्ये निक्षिप्य भुवि दुर्जयम्।
पृथिव्यां राजवंशानां भव कर्तेत्युवाच तम् ॥ **7.79.6** ॥

तथैव च प्रतिज्ञातं पितुः पुत्रेण राघव।
ततः परमसन्तुष्टो मनुः पुत्रमुवाच ह ॥ **7.79.7** ॥

प्रीतोऽस्मि परमोदार कर्ता चासि न संशयः।
दण्डेन च प्रजा रक्ष मा च दण्डमकारणे॥ **7.79.8** ॥

अपराधिषु यो दण्डः पात्यते मानवेषु वै।
स दण्डो विधिवन्मुक्तः स्वर्गं नयति पार्थिवम्॥ **7.79.9** ॥

तस्माद् दण्डे महाबाहो यत्नवान् भव पुत्रक।
धर्मो हि परमो लोके कुर्वतस्ते भविष्यति॥ **7.79.10** ॥

इति तं बहु सन्दिश्य मनुः पुत्रं समाधिना।
जगाम त्रिदिवं हृष्टो ब्रह्मलोकं सनातनम्॥ **7.79.11** ॥

प्रयाते त्रिदिवं तस्मिन्निक्ष्वाकुरमितप्रभः।
जनयिष्ये कथं पुत्रानिति चिन्तापरोऽभवत्॥ **7.79.12** ॥

कर्मभिर्बहुरूपैश्च तैस्तैर्मनुसुतस्तदा।
जनयामास धर्मात्मा शतं देवसुतोपमान्॥ **7.79.13** ॥

तेषामवरजस्तात सर्वेषां रघुनन्दन।
मूढश्चाकृतविद्यश्च न शुश्रूषति पूर्वजान्॥ **7.79.14** ॥

नाम तस्य च दण्डेति पिता चक्रेऽल्पमेधसः।
अवश्यं दण्डपतनं शरीरेऽस्य भविष्यति॥ **7.79.15** ॥

अपश्यमानस्तं देशं घोरं पुत्रस्य राघव।
विन्ध्यशैवलयोर्मध्ये राज्यं प्रादादरिन्दम॥ **7.79.16** ॥

स दण्डस्तत्र राजाभूद् रम्ये पर्वतरोधसि।
पुरं चाप्रतिमं राम न्यवेशयदनुत्तमम्॥ **7.79.17** ॥

पुरस्य चाकरोन्नाम मधुमन्तमिति प्रभो।
पुरोहितं तूशनसं वरयामास सुव्रतम्॥ **7.79.18** ॥

एवं स राजा तद् राज्यमकरोत् सपुरोहितः।
प्रहृष्टमनुजाकीर्णं देवराजो यथा दिवि ॥ **7.79.19** ॥

ततः स राजा मनुजेन्द्रपुत्रः
सार्धं च तेनोशनसा तदानीम्।
चकार राज्यं सुमहान्महात्मा
शक्रो दिवीवोशनसा समेतः ॥ **7.79.20** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनाशीतितमः सर्गः ॥